19 2020 Saturday December

महावि॰ का नाम
अ॰ वि॰ सं॰ महा वि॰ रहीमपुर, खगड़िया।

दिनाङ्क - 20.12.2020
उपशास्त्री द्वितीय वर्ष
व्याकरण
भाग-3

विषय - बहुव्रीहि समास प्रकरणम्।

सर्वस्या आगत इत्यर्थः 'तत आगतः' इत्यधिकारे 'मयट् च' इति मयट्, 'सर्वनाम्नः' - इति पुंवत्वम्, चिन्मयमित्यादिवदत्रापि स्वार्थिको वा मयट्। अथ सनाद्यन्त धातुवृत्तावुदाहरति - 'सर्वकाम्यतीति'। सर्वामात्मन इच्छतीत्यर्थे 'काम्यच्' इति सर्वाशब्दात् काम्यच्। 'सर्वनाम्नः' इति पुंवत्वम्। 'सनाद्यन्ताः' - इति धातुत्वात् लडादि। मयट् काम्यचोरत्र सार्वत्यादि परि गणितत्वेऽप्यनन्त भावत्वेऽपि तिलादिवत्ति पुंवत्वमत्र न स्यादिति भाव। सर्वस्या आगत इत्यर्थः 'तत आगतः' इत्यधिकारे 'मयट् च' इति मयट्, 'सर्वनाम्नः' - इति पुंवत्वम्, चिन्मय-मित्यादिवदत्रापि स्वार्थिको वा मयट्। अथ सनाद्यन्त धातुवृत्तावुदाहरति - 'सर्वकाम्यतीति'। सर्वामात्मन इच्छतीत्यर्थे 'काम्यच्' इति। तद्धितवृत्तौ उदाहरणान्तरमाह - 'सर्वकभार्य इति'। समासवृत्तिरेवैषा। 'सर्वप्रिय इति'। सर्वा प्रिया यस्येति विग्रहः। समासवृत्तिरियम्। प्रियादिषूदासौ रूपवतीप्रिये इत्यादौ उपयुज्यत इति भावः। वार्तिकस्तु एकशब्दे अकच्प्रत्यये 'प्रत्ययस्थात्' - इति इत्वे एकिका, तस्या भाव एकिकत्वम्। अत्र पुंवत्वे टापे इत्वस्य च निवृत्तौ एककत्वमिति स्यात्, इकारो न श्रूयेत, इत्वनिमित्तस्य टापो निवृत्तत्वात् पाचिका शब्दाज्जातीयरि पाचकजातीयेतिवत्। ह्रस्वे सति स्थानित्वे टापः

20 Sunday

NOTES

21 2020 Monday December

सत्वात् प्राप्त जीविकवदित्वं प्रवर्तमिति फलभेदसत्वाद् 'एकतद्धिते च' इति न गतार्थमित्याहुः। ननु तद्धितरा तदन्यत्यादावुत्तर पदस्य सर्वनामत्वात् पुंवत्वं स्यादित्यत आह - 'पूर्वस्यैवेदमिति'। वृत्ति प्रविष्टानेक भागानां मध्ये किञ्चिदपेक्षया पूर्वस्यैवेदं सर्वनाम्नः पुंवत्व विधानमित्यर्थः। 'भस्त्रैषा जाज्ञाद्वेति लिङ्गादिति'। 'भस्त्रैषा' इति सूत्रेण एषा द्वा इत्येतयोः साकच्कयो रपि कात्पूर्वस्य इत्वविधानम् अन्यथा निर्विषयं स्यात्। तद्धितवृत्तौ तयोः सर्वनामतया पुंवत्व नियमादिति भावः। अकचि तद्धितवृत्तावुदाहरति - 'सर्विकेति' सर्वाशब्दात् साकच्कोऽपि 'प्रत्ययस्थात्' - इति इत्वे पुंवत्वे टाबित्वयोः निवृत्तिः स्यादिति भावः। एकशेषवृत्तावुदाहरति - 'सर्वा इति'। टाबन्तस्य प्रथमा बहुवचनमिदम्। पुंवत्वे टापो निवृत्तिः स्यादिति भावः। 'कुक्कुट्यादीनामण्डादिष्विति'। पुंवत्वं वक्तव्य मिति शेषः। असमानाधिकरणार्थमिदमिति सूचयन् षष्ठी समास मुदाहरति - कुक्कुट्या अण्डं कुक्कुटाण्डमिति। पुंवत्वेन जाती लक्षणङीषो निवृत्तिरिति भावः। एवम् अग्रेऽपि। मृगक्षीरमिति। मृग्याः क्षीर मिति विग्रहः। 'काकशाव इति'। काक्याः शाव इति विग्रहः। पोतः पाकोऽर्भको डिम्भः पृथुकः शावकः शिशुः' इत्यमरः। कपड्मानिनोश्च। 'एतयोरिति'। क्यङि मानिनि च उत्तरपदे परत इत्यर्थः।

एनीवेति। एता चित्रवर्णा। चित्रं किर्मीरकल्माष शबलैताश्च कर्बुरे' - इत्यमरः एतशब्दः श्वेतपर्याय इति पाणिनीयाः। 'वर्णादनुदात्ता' - इति ङीब् नकारश्च।

दिनेश प्र॰ सिंह
(एसोसियेट प्रोफेसर)
(व्याकरण)

NOTES